वी तत्पत्रैर्यः प्रपूजयेत् । तत्काष्ठचन्दनैर्वापि स मे भक्तः स मे प्रियः । तत्काष्ठचन्दनं भाले यो धारयति मस्य मात् । तत्तत् शिवबुद्ध्या वा नमेद्देवी सुदान्विता । अतस्तच्चन्दनं देवि ! न धारयति कश्चन । तत्पत्रं तत् प्रसूनं वा कदापि धारयेन्न हि । तन्मूले महेशानि ! प्राणांस्त्यजति यो नरः । रुद्रदेहो भवेत् सत्यं पाप कोटियुतोऽपि सन्” योगिनीतन्त्रे पटले ।

“बिल्ववृक्षं तथा देवि ! भगवान् शङ्करः स्वयम् । बिल्ववृक्षतले स्थित्वा यदि प्राणांस्त्यजेत् सुधीः । तत्-क्षणान्मोक्षमाप्नोति किन्तस्य तीर्थकोटिभिः । यत्र ब्रह्मा-दयो देवास्तिष्ठन्ति मुक्तिहेतवे । बिल्ववृक्षतले स्थानं यदि विष्ठादिपूरितम् । तदेव शाङ्करं क्षेत्रं सर्वतीर्थमयं सदा । सर्वपीठमयं तत्तु सर्वदेवमयं सदा । न त्यजेत् शाङ्करं क्षेत्रं न च गङ्गां त्यजेत् प्रिये !। समीपे स च चार्वाङ्गि ! बिल्ववृक्षा यदि प्रिये ! । काशीपुरसमं तत्तु तत्र प्राणान् त्यजेद्यदि । किन्तस्य कोटितीर्थेन काशीवासेन किं प्रिये ! । पुरश्चरणचन्द्रिकायां १० पटले । तद्दानविधिर्यथा

“पत्रं वा यदि वा पुष्पं फलं नेष्टमथोत्तमम् । यथोत्-पन्नं तथा देयं बिल्वपत्रमथोत्तमम् ।” मातृकातन्त्रे ५ पटले । “शिव उवाच । शृणु देवि ! प्रवक्ष्यामि रहस्यं त्रिजटात्मकम् । पत्रं ब्रह्ममयं देवि ! अद्भुतं वर वर्णिनि ! । श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतनः । विष्णुप्रीतिकरश्चैव मम प्रीतिकरः सदा । ब्रह्मविष्णु-शिवाः पत्रे वृन्तञ्च शक्तिरूपकम् । वृन्तमूले तु वज्रं स्यात् पत्रे ब्रह्मपदं प्रिये ! । त्रिजटापत्रकैकेन हरं वा हरिमर्चयेत् । कैवल्यं तस्य तेनैव शक्तिपूजा विशेषतः । पत्रं पुष्पं फलं तोयं नैवेद्यं धूपदीपकम् । दत्त्वा यद्युत् फलं प्राप्नं तस्मात् कोटिगुणं भवेत् । सर्वैरर्चनतो देवि ! त्रिजटात्मसमर्पणम् । कैवल्यदो हरिश्चैव दासोऽहं त्वत्-स्वरूपताम् । त्वयि कैवल्यदं ज्ञानं धर्मकामार्थदं प्रिये ! । वज्रहीनमिदं देवि ! प्राप्नुयादाञ्छितं फलम् । सवज्रं क्षियते न्यूनं वज्राघातेन पार्वति ! । तस्माच्च साधकेन्द्रेण वज्रहीनं प्रदीयते” । ‘प्राणं गृहीत्वा यो गच्छेत् सर्वसिद्धिमवाप्नुयात् । ऊर्द्ध्वं सुदर्शनं रक्षेदधः पशुपति-स्तथा । पुरो माहेश्वरी रक्षेत् पृष्ठे च शूलधारिणी । दक्षपार्श्वे च श्रीनाथो वामपार्श्वे प्रजापतिः । चन्द्र सूर्यौ इतौ कलमङ्गलकारौ सदा” । ज्ञानभैरव-तन्त्रे ६ पटले । बिल्वशब्दस्य अर्थबोधकत्वेऽपि वृक्षा-

न्तरे तादृशवस्तुनोऽभावात् अन्यस्यबोधकत्वं पूजितं सर्वत्र तस्याशुद्धत्वं बोध्यम् । [आ० ३५ अ० ।

**बिल्वक** न० १तीर्थभेदे भा०अनु० २५ अ० । २नागभेदे भा०

**बिल्वकादि** पु० “बिल्वादिभ्यश्कस्य लुक्” पा०उ क्तौ कप्रत्यय लुग्निमित्ते शब्दगणे स च पा० ग० उक्तो यथा “बिल्व वेणु वेत्र वेतस इक्षु काष्ठ कपोत तृण क्रुञ्चा (क्षुद्रत्वञ्च) । तस्मात् (नडोपस्थ)”बैल्वकीयायां भूमौ भवाः वैल्वकाः तस्य लुक् न कुको निवृत्तिः ।

**बिल्वकीय** त्रि० बिल्वाः सन्ति यस्यां नडा० छ कुक् च । बिल्व-युक्तभूमौ ततो बहुत्वे बिल्वका० छस्य लुक् ।

**बिल्वज** त्रि०बिल्वात् जायते जन–ड । मालूरजाते । बिल्वस्य विषयः राजन्या० वुञ् । वैल्वजक तद्विषये ।

**बिल्वतेजस्** पु० नागभेदे भा० आ० ५७ अ० ।

**बिल्वपत्र** पु०१नागभेदे भा०भी० १०२ । ६त०२मालूरस्य पत्रे न० “विल्वपत्रलता पीडे”दुर्गोत्सवपद्धतिः ।

**बिल्वपाण्डर** पु० नागभेदे भा० आ० ३५अ० ।

**बिल्वपेषिका** स्त्री बिल्वस्य पेषः साधनत्वेन अस्त्यस्याः ठन् । (वेलशुँठ) शुष्कबिल्वखण्डे राजनि० ।

**बिल्ववन** न० ६त० । मालूरसमुदाये तस्य विषयः राजन्या० वुञ् । बैल्ववनक तद्विषये ।

**बिल्वा** स्त्री० बिल–भेदने उल्वा०नि० । हिङ्गुपत्र्यां राजनि ।

**बिल्वोदकेश्वर** पु० । शिवमूर्त्तिभेदे तस्याविर्भवकथा हरिवं० १२६ अ० । [अवेसीत् बिबेस ।

**बिस** क्षेपे दि० पर०सक०सेट् । बिस्यति । इरित् अबिसत्-

**बिस** न० बिस–क । मृणाले अमरः । [अमरः ।

**बिसकण्ठिका** स्त्री बिसमिव कण्ठोऽस्याः कप् । बलाकायाम्

**बिसकण्ठिन्** पु०बिसमिव कण्ठोऽस्त्यस्य इनि । बके राजनि०

**बिसकुसुम** न० बिसस्थितं कुसुमम् शा०त० । कमले राजनि०

बिसप्रसून तत्रार्थे अमरः । [खननकर्त्तरि ।

**बिसखा** त्रि० बिसं मृणालं खनति खन–विट् ङा । मृणाल

**बिसग्रन्थि** पु० ६त० । मृणालग्रन्थौ । तस्य जलकालुष्यनि-वारकता सुश्रुते उक्ता यथा “सप्त कलुषस्य प्रसाधनानि भवन्ति । तद्यथा कतकगोमे-दकबिसग्रन्थिशैवालमूलवस्त्राणि मुक्तामणिश्चेति” ।

**बिसनाभि** स्त्री बिसं नाभिरिवास्याः । पद्मिन्यां त्रिका०

**बिसनालिका** स्त्री बिसस्य नालिकेव । मृणाले शब्दार्थ०-कल्प० । तस्य सच्छिद्रकनालत्वात् तथात्वम् ।

**बिसल** न०बिस–कलच् । किसलये त्रिका०